## नवमः पाठः

# पितृभक्तः श्रवणकुमारः

संस्कृतसाहित्ये नीतिपराः आचारबोधकाः बह्व्यः कथाः सन्ति। यथा सतीसावित्र्याः पतिभक्तिः, श्रीरामचन्द्रस्य पितृभक्तिः, एकलव्यस्य गुरुभक्तिः इत्यादयः कथाः प्रसिद्धाः सन्ति। अस्मिन् पाठे श्रवणकुमारस्य मातापित्रोः सेवायाः निरूपणं विद्यते।

**आचार्यः** – ईशभक्तिः गुरुभक्तिः मातृपितृभक्तिश्च भारतीयसंस्कृतेः मूलम्। अद्य वयम् मातृपितृभक्तिविषये विमृशामः। नरेन्द्र! मातृपितृभक्तिविषये त्वं किं जानासि ?

**नरेन्द्रः** – गुरुवर्य! श्रूयते श्रवणकुमारः मातृपितृभक्तः आसीत् इत्येव जानामि नाधिकम्।

**आचार्यः** – शृणोतु श्रवणस्य पितरौ वृद्धौ जन्मान्धौ चास्ताम्।

**भरतः** – गुरुदेव! श्रवणस्य पित्रोः नाम किम् ? श्रवणेन किञ्च कृतम् ?

**आचार्यः** – श्रवणस्य मातुः नाम भाग्यवती पितुः नाम शान्तनुः च आस्ताम्।



श्रवणः मातरं पितरं च विहङ्गिकायाम् उपावेश्य स्वस्कन्धे तां धृत्वा तीर्थाटनम् अकारयत्। सः वनात् वनान्तरे भ्रमन् तमसानद्याः तीरं समागतः। संयोगात् अयोध्यायाः नृपः दशरथः आखेटं कुर्वन् सैनिकैः वियुक्तः मार्गात् भ्रष्टः तत्रैव वनमागतवान्। तदैव श्रवणः पित्रोः पिपासाशमनार्थं वारि आनेतुं तमसा तीरं जगाम। जलग्रहणकाले जलपात्रात् समुत्पन्नां ध्वनिं श्रुत्वा दशरथः "कश्चित् जन्तुः जलं पिबन् अस्ति" इति अनुमीय शब्दलक्ष्यं कृत्वा त्वरितमेव बाणम् अमुञ्चत्। यतो हि दशरथः शब्दवेधि-बाण-विद्यायां निपुणः आसीत्।

**शिष्याः** – (साश्चर्यम्) तदा किमभवत् ?

**आचार्यः** – शृण्वन्तु! श्रवणकुमारस्य हृदये संलग्नः सः शरः तस्य मर्मभेदनम् अकरोत्। तदा जन्तोः स्थाने मानववाणीं श्रुत्वा दशरथः त्वरितमेव तत्रागतः। तत्र बाणविद्धं श्रवणं दृष्ट्वा दुखितः अभवत्। स तमुत्थाय तस्य परिचयं पृष्टवान्।

**शिष्याः** – श्रवणेन किं कथितम् ?

**आचार्यः** – स्वपरिचयं दत्वा तेन कथितम् – राजन्! मम मृत्योः किमपि दुःखं नास्ति, परन्तु मम पितरौ वृद्धौ अन्धौ च स्तः। इदानीं तौ पिपासितौ। अतः भवान् शीघ्रं गत्वा तौ जलं पाययतु। तदा दशरथः अवदत् – वत्स! अन्यः कस्ते अभिलाषः? श्रवणः अवदत् – मम पित्रोः योगक्षेमं कल्पयित्वा अद्यारभ्य भवान् कदापि निरपराधिनां जन्तूनां हिंसनं मा करोतु इत्युक्त्वा श्रवणः स्वप्राणान् अत्यजत्।

**महेशः** – ततः किमभवत् ?

**आचार्यः** – ततः दशरथः पात्रे जलं गृहीत्वा श्रवणस्य पित्रोः समीपं गतः। तौ पिपासया आकुलौ श्रवणम् आह्वयन्तौ कस्यापि आगमनसङ्केतं प्राप्य "वत्स श्रवण" इति अवोचताम्। दशरथः शनैः शनैः तयोः समीपं गत्वा अब्रवीत्– "गृह्यताम् जलम्"।

अयं शब्दः श्रवणस्य नास्ति इति विचार्य तौ अपृच्छताम्, को भवान् आवाभ्याम् जलम् प्रयच्छति ? तदा राजा नितरां लज्जितः दुःखितश्च सर्वं वृत्तान्तम् अश्रावयत्। तच्छ्रुत्वा तयोः उपरि वज्रपातः इव सञ्जातः। वृद्धावस्थाऽन्धता, वने निवासः, एकः पुत्रः, तस्यापि अकस्मात् बाणेन मृत्युः इत्यादि कारणैः व्याकुलौ भूत्वा तौ विलपन्तौ, राजानम् अकथयताम्–तव कारणात् एव पुत्र–शोकेन पीडितौ आवाम् इदानीम् प्राणान् परित्यजावः, अतः त्वमपि पुत्रशोकेन प्राणान् परित्यक्ष्यसि इति राजा शप्तः। रामस्य वनगमनकाले तच्छापवशात् पुत्रशोकेन दशरथोऽपि दिवङ्गतः।

**छात्राः** – आचार्य! वयं ज्ञातवन्तः यत् वस्तुतः श्रवणः पितृभक्तः आसीत्। एतदर्थं तस्य नाम जगतीतले प्रसिद्धम्।

## शब्दार्थः

| | | | | | |
|---|---|---|---|---|---|
| विहङ्गिका | – | काँवर | अनुमीय | – | अनुमान करके |
| आखेटकम् | – | शिकार | वियुक्तः | – | अलग |
| पिपासा | – | प्यास | अभिलाषः | – | इच्छा |
| शप्तः | – | शाप दिया | शरः | – | बाण |
| योगक्षेमम् | – | अप्राप्त की प्राप्ति एवं प्राप्त हुए की रक्षा | | | |

## अभ्यासः

### ( 1 ) एकपदेन उत्तरं लिखत –

(क) पितृभक्तः कः आसीत् ?

(ख) श्रवणः जलार्थं कुत्र गतः ?

(ग) श्रवणकुमारस्य मातुः नाम किम् ?

(घ) शब्दवेधि–बाण–विद्यायां निपुणः कः ?

### ( 2 ) एकवाक्येन उत्तरं लिखत –

(क) श्रवणस्य पितरौ कीदृशौ आस्ताम् ?

(ख) श्रवणः पित्रोः तीर्थाटनं कथमकारयत् ?

(ग) दशरथः किमर्थं वनं गतवान् ?

### ( 3 ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) बाणविद्धस्य श्रवणस्य कः अभिलाषः आसीत् ?

(ख) श्रवणस्य वृत्तं ज्ञात्वा पित्रोः का दशा सञ्जाता ?

(ग) श्रवणस्य पितरौ किं शापं दत्तवन्तौ ?

## ( 4 ) यथायोग्यं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | पितरौ | महाराजः |
| (ख) | श्रवणकुमारः | नदी |
| (ग) | दशरथः | वृद्धौ |
| (घ) | तमसा | पितृभक्तः |

## ( 5 ) अधोलिखितवाक्यानां शुद्धिः करणीया–

(क) श्रवणकुमारस्य पित्रानाम शान्तुनः आसीत्।

(ख) दशरथः वने गतवान्।

(ग) पितरौ अन्धः आस्ताम्।

(घ) श्रवणः जगतीतलं प्रसिद्धम्।

## ( 6 ) कोष्ठकस्थैः शब्दैः वाक्यानि रचयत –

| यथा | कथा | एषा कथा त्रेतायुगस्य अस्ति। |
|---|---|---|
| (क) | श्रवणः | |
| (ख) | दशरथः | |
| (ग) | भवान् | |
| (घ) | अहम् | |
| (ङ) | मम | |

## ( 7 ) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत–

(क) श्रवणकुमारः पित्रोः भक्तः आसीत्। ☐

(ख) माता–पितरौ अन्धौ न आस्ताम्। ☐

(ग) एषा कथा कलियुगस्य अस्ति। ☐

(घ) दशरथः महाराजः आसीत्। ☐

(ङ) श्रवणः तमसातीरं न गतवान्। ☐

## ( 8 ) उचितविकल्पेन वाक्यानि पूरयत -

(क) पितरौ . . . . . . . . . . . . . . आस्ताम्। (बुभुक्षितौ / पिपासितौ)

(ख) श्रवणः . . . . . . . . . . . . . . आनेतुं तमसा तीरम् आगतः। (वारि / वारिम्)

(ग) दशरथः . . . . . . . . . . . . . . अतिनिपुणः आसीत्। (शस्त्रविद्यायाम् / बाणविद्यायाम्)

## ( 9 ) सन्धिविच्छेदं कुरुत -

(क) तीर्थाटनाय

(ख) नरेन्द्रः

(ग) जन्मान्धौ

(घ) किञ्च

## ( 10 ) समुचितेन अक्षरेण रिक्तस्थानपूर्तिं कुरुत -

(क)

| | | | | | |
|---|---|---|---|---|---|
| | व | | कु | | रः |

(ख)

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | रा | | | श | र | |

(ग)

| | | | | |
|---|---|---|---|---|
| | ण | | द्या | यां |

## योग्यताविस्तारः -

- पञ्चवाक्येषु कथायाः सारं लिखत ।

❖ ❖ ❖